# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 7** गुणाः –70

विषयः – धर्मशास्त्रम् (गौण) **कोड –C.E.-2.4.4** समयः - 3 तः 6 पर्यन्तम्

दिनाङ्कः –5/04/2019 सन्दर्भग्रन्थः – याज्ञवल्क्य स्मृतिः (व्यवहाराध्यायः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्।
मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥

(2) संदिग्धार्थं स्वतन्त्रोयः साधयेद्यश्चानिष्पतेत्।
न चाहूतो वदेत्किचिद्धीनो दण्डश्च स स्मृतः॥

(3) निह्नुते लिखितं नैक मेकदेशे विभावितः।
दाप्यः सर्वं नृपेणार्थं न न ग्राह्यस्त्व निवेदितः॥

**प्रश्नः-2 एकस्य सविस्तरमुत्तरं लिखत।** **10**

(1) अभियोगे साक्ष्ये च कीदृशाः दुष्टाः भवन्ति, तद्विषये विवेचयन्तु।

(2) घटविधिं ग्रन्थानुसारं विवेचयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।** **10**

(1) अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम्।
अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता॥

(2) महोक्षोत्सृष्टपशवः सूतिका गन्तुकादयः।
पालो येषां न ते मोच्या दैवराजपरिप्लुताः॥

(3) विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृप्पेदमम्।
क्रेतामूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी॥

**प्रश्नः-4 एकस्य सविस्तरमुत्तरं लिखत।** **10**

(1) सीमाविवादविषये ग्रन्थोक्तं स्पष्टयत।

(2) वेतनादानप्रकरणं स्मृत्युक्तंस्पष्टयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 श्लोकद्वयं व्याख्यात।** **10**

(1) स जातावुत्तमोदण्ड आनुलोम्ये तु मध्यमः।
प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम्॥

(2) अवरुद्धासु दासीषु भुजिष्यासु तथैव च।
गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकं दमम्॥

(3) गृहीत वेतना वेश्या नेच्छन्ती द्विगुणं वहेत्।
अगृहीते समं दाप्य युमानप्येव मेवहि॥

**प्रश्नः-6 एकस्य उपरि निबन्धं निबन्धयत।** **10**

(1) "साहसिकविशेषं प्रतिदण्डः" इति विषये ग्रन्थानुसारं लिखत।

(2) स्तेयलक्षणं विलिख्य स्तेयग्रहणोपायान् सन्देहनियमान् वर्णयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघूत्तरणि लिखत।** **10**

(1) उपनिधेः परिभाषा का?
(2) सीमाविवादे कः निर्णयः?
(3) पशुविशेषे कः सम्बन्धित दण्डः?
(4) साहसं कति विधम्?
(5) स्तेयलक्षणं किम्?
(6) याज्ञवल्क्यस्मृतेः कः कर्ता?
(7) याज्ञवल्क्यस्मृतेः कति अध्यायाः सन्ति?
(8) प्रमाणं कति विधम्?
(9) दुष्टलक्षणं किम्?
(10) साक्षिभेदाः कति वर्तन्ते?
(11) पुत्रिकालक्षणं लिखत।
(12) दत्तकपुत्रलक्षणं किम्?
(13) केशादिलुञ्चने को दण्डः?
(14) सभासद लक्षणं किम्?
(15) मध्यम साहसे कः दण्डः?